तथेति" या० स्मृत्येकवाक्यत्वात्। व्यक्तमुक्तम् "गन्धपुष्प-कुशान् शय्यां शाकं मांसं पयोदधि। मणिमत्स्यौ गृहं धान्यं ग्राह्यमेतदुपस्थितम्। मधूदकं फलं मूलमेधांस्य भयदक्षिणा अभ्युद्यतानि ग्राह्याणि" का०ख०। तेनैषामेवायाचिताहृतानां ग्राह्यता नान्येषाम्। एवञ्च चण्डालादितोऽपि शय्यादिभिन्नानामुपढौकितानामपि अप्रतिग्राह्यता। शूद्रादिप्रतिग्रहनिषेधस्तु अनापद्येव, आपदि तु तस्य कर्त्तव्यता "याजनाध्यापने नित्यं क्रियेते संस्कृतात्मनाम्। प्रतिग्रहस्तु क्रियते शूद्रादप्यन्त्यजन्मन" इति "अशक्तिकर्षितः सीदन्निमं धर्म्मं समाचरेत् सर्वतः प्रतिगृह्णीयात् ब्राह्मणस्त्वनयं गतः" इति मनुना तस्याभ्यनुज्ञानात्। तत्र स्तेनात् द्रव्यं कथञ्चिदपि न प्रतिग्राह्यम् "योऽदत्तादायिनोहस्तात् लिप्सेत ब्राह्मणोधनम् याजनाध्यापनेनापि यथा स्तेनस्तथैव सः" या०उक्तेः आपदि शूद्रधनस्य ग्राह्यत्वेऽपि यज्ञार्थतया न ग्राह्यता "न यज्ञार्थं धनं शूद्राद्विप्रोलिप्सेत कर्हिचिदिति" मनुना कर्हिचिदित्यनेन आपद्यपि तस्य निषेधात् "ये शूद्रादधिगम्यार्थमग्निहोत्रमुपासते ऋत्विजस्ते हि शूद्राणां ब्रह्मवादिषु गर्हिता" इति मनूक्तेश्च। तत्र द्रव्यविशेषे प्रतिग्रहनिषेधः। "मृतशय्याहृग्राही न पुनर्मानवोभवेदिति" पुरा०। "शस्त्रं विषं सुरा चाप्रतिग्राह्या ब्राह्मणानामन्येषाञ्च" वशि०। विषं सुवर्णम्" "मद्यमदेयमपेयमनिग्राह्यमिति" ति०त० उश०। "मणिवासोगवादीनां प्रतिग्रहे सावित्र्यष्टोत्तरं जपेत् पञ्चरात्रं, मध्यमे द्वादशरात्रं पयोव्रतः शतसहस्रमसत्प्रतिग्रहे" हारी० "हिरण्यं भूमिमश्वं गामन्नं वासस्तिलान् घृतम्। अविद्वान् प्रतिगृह्णानो भस्मीभवति दारुवत्" मनुः। अविद्वानित्युक्तेः विदुषो न दोषाय। "किं करिष्यत्यसौ मूढोगृह्णन्ननुभयतोमुखीम्। सहस्रं वारुणाः पाशाः क्षुरधारासमन्विताः। पूर्णे वर्षसहस्रे तु पाश एकः प्रमुच्यते। एतामवस्थां प्राप्नोति गृह्णन्नुभयतोमुखीमिति" म०पु०। एतस्य विद्वदविद्वद्विषये निषिद्धता कृष्णाजिनादीनां तु अग्राह्यशब्दे ६७८पृ० उक्ता। देशकालविशेषे च प्रतिग्राह्याणामप्य प्रतिग्राह्यता "न तीर्थे प्रतिगृह्णीयात् पुण्येष्वायतनेषु च। निमित्तेषु च सर्व्वेषु अप्रमत्तोद्भवेद्द्विजः" "तीरे प्रतिग्रहस्त्याज्यस्त्याज्यो धर्म्मस्य विक्रय" इति प्रा०त०पु०। "पानीयं पायसं भैक्षं घृतं लवणमेव च। हस्तदत्तं न गृह्णीयात् तुल्यं गोमांसभक्षणैः" इति का० ख०। "नत्वेकं पुत्रं दद्यात् प्रतिगृह्णीयाद्वा स हि सन्तानाय पूर्व्वेषा" मित्यनेन ज्येष्ठपुत्रदानप्रतिग्रहयोर्निषेधेन तस्याप्यप्रतिग्राह्यता। तथा "न स्त्री पुत्रं दद्यात् प्रतिगृह्णीयाद्वाऽन्यत्राऽनुज्ञानात् भर्त्तुरिति" स्मृतेः भर्त्रनुज्ञामन्तरेण स्त्रियाः पुत्रस्याप्रतिग्राह्यता। परितोषार्थं विसृष्टग्रहणे तु न दोषः। न प्रतिग्राह्यं यस्मात् ५त०। प्रतिग्राह्यद्रव्यादानान बधौ शौकरिकादौ चण्डालादौ च पु०। "न भोज्याश्चा अप्रतिग्राह्या" इति प्रागुक्तमनुवाक्यम्। "प्रायश्चित्तद्रव्यग्रहणे दोष" इति प्रा०वि०।

**अप्रतिघ** त्रि० नास्ति प्रतिघः प्रतिघातकोऽस्य। १ प्रतिघातकशून्ये अप्रतिबद्धे "यत्तु दुःखसमायुक्तमप्रीतिकरमात्मनः। तद्रजोऽप्रतिघं विद्यात् सततं हारि देहिनामिति" मनुः।

**अप्रतिद्वन्द्व** त्रि० प्रतिगतः द्वन्द्वं विरोधं स्पर्द्धां वा अत्या०स० न० त०। १प्रतिस्पर्द्धाशून्ये "त्वामप्रतिमकर्म्माणमप्रतिद्वन्द्वमाहवे" रामा०। प्रतिद्वन्द्वः सहचरः। २तच्छून्ये च "सोऽहं वनमिदं प्राप्तोनिर्जनं लक्षणान्वितः। सीतया चाप्रतिद्वन्द्व" इति रामा०।

**अप्रतिपक्ष** त्रि० नास्ति प्रतिपक्षः विपक्षः सदृशो वा यस्य। १विपक्षहीने २असदृशे च।

**अप्रतिपत्ति** स्त्री प्रतिपत्तिः कर्त्तव्यतानिश्चयः अभावे न० त०। इतिकर्त्तव्यतानिश्चयाभावे "अप्रतिपत्तिविह्वलानि चेन्द्रियाणि" काद०। २ निश्चयाभावे ३ अस्वीकारे ४अग्रहणे ५स्फूर्त्त्यभावे "उत्तरस्याप्रतिपत्तिरप्रतिभेति" गौ०सू०। न०ब०। ६तच्छून्ये त्रि०।

**अप्रतिपद्** त्रि० प्रतिपद्यते जानाति प्रति+पद्—क्विप् न०त०। विकले "सर्वदेवेभ्यो प्रतिपदम्" य० २०,८। "अप्रतिपदं विकलमिति" वेददी०।

**अप्रतिपन्न** त्रि० न०त०। १अज्ञाते २अनङ्गीकृते च।

**अप्रतिबद्ध** त्रि० न प्रतिबद्धः निरुद्धः न०त०। अनिरुद्धे उद्दामे।

**अप्रतिबल** त्रि० नास्ति प्रतिबलः प्रतिपक्षो यस्य। १ अति-प्रबले २ विपक्षहीने च।

**अप्रतिभ** त्रि० नास्ति प्रतिभा यस्य। १ प्रतिभाशून्ये २अप्रगल्भे ३ स्फूर्त्तिशून्ये ४ प्रत्युत्पन्नमतिशून्ये ५अधृष्टे ६लज्जिते च।

**अप्रतिभा** स्त्री अभावे न०त०। वादिप्रतिवादिनोर्वादे प्रवृत्ते वादिनोद्भावितदोषोद्धारणोपायज्ञानेऽपि तत्कालं प्रतिवादिनः१ स्फूर्त्त्यभावरूपे निग्रहस्थानभेदे "उत्तरस्या प्रतिपत्तिरप्रतिभेति" गौ०सू०।२ प्रगल्भताभावे च।